श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीविवाहवरदस्तवः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीविवाहवरदस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

अन्तस्स्थस्त्वमशेषाणाम्
    अन्तस्स्थमपि वाञ्छितम्।
आपूरयसि यत्तस्मात्
    अन्तस्स्थघटिताह्वयः॥ १ ॥

राते! भृगूणां चरणं त्वदीयम्
    अरातिमस्माकमितोऽपनेतुम्।
पाप्मानमेनं शरणं प्रपन्नं
    श्रीवत्सवक्षः! परिपाहि वत्सम्॥ २ ॥

राते! भृगूणामपि भार्गवस्त्वम्
    अर्चावतारेऽपि च भार्गवस्य।
पुत्रत्वमासाद्य परं प्रसिद्धः
    तद्वंशजाते मयि तत्प्रसीद॥ ३ ॥

किं वा रघूणां किमु वा यदूनाम्
    अथो भृगूणां रतिरन्ववाये।
तव प्रभो! सत्त्वमये भृगूणाम्
    अर्चावतारेऽपि यदत्र जातः॥ ४ ॥

कविक्रतुं भार्गवमत्र पूर्वम्
    आराधयन्नङ्गिरसो गुरुस्त्वाम्।
शतक्रतोराप स शापमुक्तः
    सतीं गतिं गीष्पतिरित्यवैमि॥ ५ ॥

www.prapatti.com

रामावतारेऽपि च हस्तिनाथ!
    भृग्वङ्गिरस्साम्यमुपैति दीप्त्या।
इतीव सक्तस्त्रिजटे स पूर्वम्
    अदा मुदा गा भगवन्नसङ्ख्याः॥ ६॥

श्रीमता रामभद्रेण श्रीरामनवमीमहे।
श्रीमतो देवराजस्य सञ्चारो दृशि वर्तते॥ ७॥

तावन्न चेत्त्वमुपगच्छसि शार्ङ्गधन्वे-
    त्यन्तस्सदा निगमशेखरसूरिसूक्तिम्।
सञ्चिन्तयन् भजसि मामिति चापहस्त-
    रामाकृतिश्च मम दर्शनमेषि स त्वम्॥ ८॥

पट्टाभिषेको विहतो ममाऽपि
    कालेन भूयोऽपि बभूव तस्मात्।
तथा विवाहोऽपि कुमारिकायाः
    तवेति मा चिन्तय चिन्तयेमम्॥ ९॥

कपीन्द्रमादौ परितापभाजं
    नापालयं वत्स! दिने परस्मिन्।
विहत्य शत्रुं यदपालयं तं
    कवीन्द्र! तच्चिन्तय तत्त्वमन्तः॥ १०॥

इत्येवमग्रे कथयन्निव त्वं
    मां रक्षितुं वा करिशैलनाथ!।
मातुस्सभां ते किमु वीक्षितुं वा
    मुहुर्मुहुस्सञ्चरणं विधत्से॥ ११॥

हस्ते हस्ते गोकुले गोपिकानां
    हस्ते हस्तिक्ष्माधरे चावतीर्णम्।
मस्ते मस्ते वेदवाचां चरन्तं
    मस्ते हस्तौ संयुतौ न्यस्य नौमि॥ १२॥



www.prapatti.com

मत्पापकोट्या विहते विवाहे
 तवावतारोत्सवपुण्यकाले।
श्रीपुण्यकोट्यामिह सञ्चरंस्त्वं
 विवाहविघ्नं विधुनोषि सत्यम्॥ १३ ॥

विवाहमाहुर्विबुधा भवन्तं
 विशेषतोऽस्मिन् नगरे स सेव्यः।
विवाह आसीद्विहतोऽत्र नाथ!
 विधीशसंसेव्य! विधेहि युक्तम्॥ १४ ॥

त्वदर्थमेवाहमितो गतस्तं
 सम्प्रार्थ्य नाथं वरदं समागाम्।
मा भीतिमेया इति वेदमौलि-
 गुरुस्सभारम्भदिने नु वक्ति॥ १५ ॥

सभान्तरा वारणशैलनाथः
 श्रीक्षीरनद्यामवतीर्य चागात्।
गुरूत्तमक्षीरप एष कुक्षौ
 ममापि भूयोऽप्यदधात्स दुग्धम्॥ १६ ॥

ब्रह्माश्वमेधे रचितावतारं
 ब्राह्मे मुहूर्ते कलितप्रयाणम्।
ब्राह्मेण घोषेण पवित्रमार्गं
 ब्राह्मं परं बिम्बमहं स्मरामि॥ १७ ॥

द्रमिडनिगमगोष्ठ्या स्तूयमानं पुरस्तात्
 सुभगधवलपीनच्छत्रयुग्माभिरामम्।
अमरफणितिवेदैः पृष्ठतो रक्ष्यमाणं
 स्मरति मम मनस्तं सर्वदा देवराजम्॥ १८ ॥

करिशिखरिविटङ्कात् कल्पकं कञ्चिदेकं
 कमलकलितलीलां काश्यपीं चापि कान्ताम्।

www.prapatti.com

कनकमणिमयाङ्गीं पार्श्वयोर्लालयन्तं
कलय हृदय! नित्यं काङ्क्षितान् भुङ्क्ष्व भोगान्॥ १९ ॥

जङ्घाभिः परिपूरिताऽपि सततं यानैस्तथान्यैरपि
प्राण्याद्यैः परितो वृताऽपि झटिति प्राप्ते हरावद्भुतम्।
या पुण्ड्राङ्कितदेहवैष्णवमयी वेदद्वयीघोषणा
काञ्चीसन्निधिवीथिकाऽतिसुभगा सा भातु चित्ते सदा॥ २० ॥

आनैजालयमानिलात्मजकुलं सञ्चारमातन्वतः
मूर्तिं कामपि देवदेव! भवतस्सञ्चिन्तये सन्ततम्।
गम्भीरां मधुरां विभूषणगणैरत्युज्ज्वलां दामभिः
पुष्पाणां सुभगां श्रिया वसुधया संसेवितां सादरम्॥ २१ ॥

अग्नेरुत्पतितोऽसि तेन तव ते देहे व्रणानां किणाः
सान्द्रा हन्त तथापि हन्त जनतामाकर्षयन्त्यद्भुतम्।
न्यस्तास्तत्र तथा हि दृष्टय इमा नैव व्रणानां गणाः
देहे युक्तमिदं तथा हि भगवन्! श्रीदेवराजो यतः॥ २२ ॥

दीपैर्मौलिधृतैः प्रदीपनिचयैर्मत्ताप्युदीपैर्वृतः
प्रान्तोद्यत्करदीपिकोदितमहाकर्पूरनीराजितः।
शोभां काञ्चन वीथिकामधि भवान् सान्तः पुरस्संवमन्
मालान्तर्गत! मे मनश्च नयनं दिव्यामृतैस्सिञ्चति॥ २३ ॥

खड्गं केटकमावहन्ननुगतः श्रीसूत्रवत्याः पतिः
पूर्णा सन्निधिवीथिकाऽपि मनुजैः त्वद्रूपमुग्धेक्षणैः।
कल्याणं बत दर्शनं च वितरन् सान्तः पुरो यद्भवान्
यात्राभून्न वनाय सेयमवनायैवेति मन्ये मम॥ २४ ॥

विघ्ने जाते तन्निहन्तुं क्षणेन
विष्वक्सेनं खड्गकेटौ दधानम्।
पश्चात्कुर्वन् प्रस्थितो दर्शनीयो
मन्दं मन्दं मां नु पातु वनं वा॥ २५ ॥

हस्त्यद्रिनाथेति भवन्तमीड्यं
तं हस्तिनाथेति वदन्ति सन्तः।
हस्ती स साक्षान्नहि शैल एषः
हस्त्यद्रिरास्ते पिशिताक्षिभाजाम्॥ २६॥

देवीं त्वदीयां किल हस्तिनाद-
प्रबोधिनीं वेदगिरो वदन्ति।
तस्याः पुरस्तादयमेव हस्ती
तस्मिन् हि नादो ननु वेदवाचाम्॥ २७॥

श्रीसूक्तमेवं वदतीदमास्तां
श्रीवत्सचिह्नाः कवयो महान्तः।
परं भवान् वस्त्विति हस्तिनैव
त्रया समुद्धोषितमित्युदाह॥ २८॥

तद्धस्तिनाथेति पदं प्रमादात्
तद्धस्तिनादेति वदन्ति विप्राः।
नो चेन्महादेव्यभिधानमत्र
कथं घटेतेति वद त्वमत्र॥ २९॥

वरद! ननु सरस्त्वं त्वां प्रपन्नो नरोऽहं
वरमिह यदि दद्याः वाञ्छितं मे तदानीम्।
सवर इति समस्तैः कीर्तितोऽहं भवेयं
तव च भवति कीर्तिस्साम्यदायीति सत्या॥ ३०॥

षड् देव्यस्तव षड्गिरस्त्वदुदिताः षट् ते गुणाश्शोभनाः
षट्स्वङ्गश्रुतिरूप! षट्श्र्यनुगताः अर्थाश्च षड् युक्तयः।
षट्सामीक्षणषण्मुखादिनुत हे! षड्कत्रयाचार्य! ते
षड्भ्रातृव्यषडूर्मितप्तहृदयः कुर्वे षडङ्गां नुतिम्॥ ३१॥

वेदोद्धारण! मन्दरागभरण! श्लाघ्यक्षमाधारण!
प्रह्लादस्थितमानसात्ममहिमश्रीगोपनैकव्रत!।

श्रीमच्छ्रीभृगुवंशजात ! वरद ! श्रीलक्ष्मणातिप्रिय !
श्रीमद्यामुनकर्षणाप्तमधुर ! स्वामिन् ! कलेः पाहि नः॥ ३२॥

श्रीवारणाद्रिनिलयाय मनोहराय
श्रीवात्स्यदेशिकसुताय हितप्रदाय।
श्रीवारिजातभवयज्ञसमुद्भवाय
श्रीवाञ्छिताय वरदाय नमो नमोऽस्तु॥ ३३॥

वरदं विषयीकृत्य स्तोत्रं श्रीनिधिना कृतम्।
वरदं तदिदं चापि पठतां भक्तिपूर्वकम्॥ ३४॥

॥ इति श्रीविवाहवरदस्तवः समाप्तः॥

www.prapatti.com